र्म्मक्षयानन्तरं सम्पद्यते बन्धशून्यतया कैवल्यभाजनतारूपेण सम्पद्यते। अस्य—उत्पन्नविवेकज्ञानस्य तावदेव चिरं कैवल्यप्राप्तौ विलम्बः, यावत् विमोक्ष्ये प्रारब्धकर्म्मभिरिति शेषः विमोक्ष्ये ततोऽह्नि प्राप्स्यतीत्यर्थः। अथ प्रारब्धकर्म्ममोचनानन्तरं सम्पत्स्ये कैवल्यरूपेण सम्पन्नो भविष्यतीत्यर्थः”।

“प्राप्ते शरीरभेदे चरितार्थत्वात् प्रधानविनिवृत्तेः। ऐकान्तिकमात्यन्तिकमुभयं कैवल्यमाप्नोति” सा॰ का॰।

“अनारब्धविपाकानां तावत्कर्म्माशयानां तत्त्वज्ञानाग्निना वीजभावो दग्धः प्रारब्धविपाकानान्तूपभोगेन क्षये सति प्राप्ते शरीरभेदे विनाशे चरितार्थत्वात्कृतप्रयोजनत्वात्प्रधानस्य तं पुरुषं प्रति निवृत्तावैकान्तिकमवश्यम्भावि आत्यन्तिकमविनाशीत्युभयं कैवल्यं दुःखत्रयविगमं प्राप्नोति पुरुषः” त॰ कौ॰ विवृतञ्चैतदस्माभिः

“ज्ञानाग्निः सर्वकर्म्माणि भस्मसात् कुरुतेऽर्ज्जुन!” इति “नाभुक्तं क्षीयते कर्म्म कल्पकोटिशतैरपीति” शास्त्रयोः प्रारब्धाप्रारब्धकर्म्मविषयकत्वेन चयाक्षयौ व्यवस्थापितावित्याशयेनाह तत्त्वज्ञानाग्निनेत्यादि”।

पातञ्जले कैवल्यपादे कैवल्यकारणमुक्त्वा तत्स्वरूपमुक्तं यथा “विशेषदर्शिन आत्मभावभावनानिवृत्तिः” सू॰। “यथा प्रावृषि तृणाङ्कुरस्योद्भेदेन तद्बीजसत्तानुमीयते तथा मोक्षमार्गश्रवणेन यस्य रोमहर्षाश्रुपातौ दृश्येते तत्राप्यस्ति विशेषदर्शनवीजमपवर्गभागीयं कर्म्माभिनिर्वर्त्तितमित्यनुमीयते तस्यात्मभावभावना स्वाभाविकी प्रवर्त्तते यस्याभावादिदमुक्तं स्वभावं मुक्त्वा दोषाद्येषां पूर्व्वपक्षे रुचिर्भवत्यरुचिश्च निर्णये भवति तत्रात्मभावभावना कोऽहमासं, कथमहमासं, किं स्विदिदं मे, कथं स्विदहं, के भविष्याम, इति’ सा तु विशेषदर्शिनो निवर्तते कुतः चित्तस्यैष विचित्रः परिणामः पुरुषस्त्वसत्यामविद्यायां शुद्धश्चित्तधर्म्मैरपरामृष्ट इति ततोऽस्यात्मभावभावना कुशलस्य निवर्त्तते इति” भाष्यम्।

“तदा विवेकनिम्नं कैवल्यप्राग्भारञ्चित्तम्” सू॰।

“तदानीं यदस्य चित्तं विषयप्राग्भारमज्ञाननिम्नमासीत्तदस्यान्यथा भवति कैवल्यप्राग्भारं विवेकजज्ञाननिम्नमिति” भाष्यम्। “प्रसंख्यानेऽप्यकुसीदस्य सर्वथा विवेकख्यातेर्धर्म्ममेघः समाधिः” सू॰। “यदायं ब्राह्मणः प्रसंख्यानेऽप्यकुसीदस्ततोऽपि न किंचित् प्रार्थयते तत्रापि विरक्तस्य सर्वथा विवेकख्यातिरेव भवतीति संस्कारवीजक्षयान्नास्य प्रत्ययान्तराण्युत्पद्यन्ते तदास्य धर्म्ममेघो नाम समाधिर्भवति” भा॰। “ततः क्लेशकर्म्मनिवृत्तिः” सू॰। “तल्लाभादविद्यादयः क्लेशाः समूलकाषं कषिता भवन्ति कुशलाकुशलाश्च कर्म्माशयाः समूलघातं हता भवन्ति क्लेशकर्म्मनिवृत्तौ जीवन्नेव विद्वान् विमुक्तो भवति कस्मात्? यस्माद्विपर्य्ययो भवस्य कारणं न हि क्षीणविपर्य्ययः कश्चित्केनचित् क्वचिज्जातो दृश्यते” भा॰।

“तदा सर्वावरणमलापेतस्य ज्ञानस्यानन्त्यं ज्ञेयमल्पम्” सू॰ “सर्व्वैः क्लेशकर्म्मावरणैर्विमुक्तस्य ज्ञानस्यानन्त्यं भवति तमसाभिभूतमावृतज्ञानसत्त्वं क्वचिदेव रजसा प्रवर्त्तितमुद्घाटितं ग्रहणसमर्थं भवति तत्र यदा सर्वैरावरणमलैरपगतमलम्भवति तदा भवत्यस्यानन्त्यं ज्ञानस्यानन्त्याज्ज्ञेयमल्पं सम्पद्यते यथाकाशे खद्योतः, यत्रेदमुक्तम् “अन्धो मणिमविध्यत्तमनङ्गुलिरावयत्। अग्रीवस्तं प्रत्यमुञ्चत्तमजिह्वोऽभ्यपूजयदिति” भा॰।

“ततः कृतार्थानां परिणामक्रमसमाप्तिर्गुणानाम्” सू॰। “तस्य धर्म्ममेघस्योदयात्कृतार्थानां गुणानां परिणामक्रमः परिसमाप्यते न हि कृतभोगापवर्गाः परिसमाप्तक्रमाः क्षणमप्यवस्थातुमुत्सहन्ते” भा॰

“गुणाधिकारक्रमसमाप्तौ कैवल्यमुक्तन्तत्स्वरूपमवधार्य्यते” भा॰ “पुरुषार्थशून्यानां गुणानां प्रतिप्रसवः कैवल्यं स्वरूपप्रतिष्ठा वा चितिशक्तिरिति” सू॰। कृतभोगापवर्गाणां पुरुषार्थशून्यानां यः प्रतिप्रसवः कार्य्यकारणात्मना गुणानान्तत्कैवल्यं स्वरूपप्रतिष्ठा पुनर्बुद्धिसत्त्वानभिसम्बन्धात्पुरुषस्य चितिशक्तिरेव केवला तस्याः सदा तथैवावस्थानं कैवल्यमिति” भा॰।

“कैवल्यरूपावधारणपरस्य सूत्रस्यावान्तरसङ्गतिमाह गुणाधिकारेति पुरुषार्थशून्यानां गुणानां प्रतिप्रसवः कैवल्यं स्वरूपप्रतिष्ठा वा चितिशक्तिरिति। कुतः करणीयतया पुरुषार्थशून्यानां यः प्रतिप्रसवः स्वकारणे प्रधाने लयः, तेषां कार्य्यकारणात्मनां गुणानां व्युत्थानसमाधिनिरोधसंस्कारा मनसि लीयन्ते मनोऽस्मितायाम्, अस्मिता लिङ्गे, लिङ्गमलिङ्गे” इति योऽयं गुणानां कार्य्यकारणात्मकानां प्रतिसर्गः तत् कैवल्यं, यं कञ्चित् पुरुषं प्रति प्रधानस्य मोक्षः स्वरूपप्रतिष्ठा पुरुषस्य वा मोक्ष इत्याह। स्वरूपेति। अस्ति हि महाप्रलयेऽपि स्वरूपप्रतिष्ठा चितिशक्तेर्न चासौ मोक्ष इत्यत आह पुनरिति सौत्र इतिशब्दः शास्त्रपरिसमाप्तौ” वा॰ विवरणम्।